वेदशक्तिर्वेदमाता वेदविद्याप्रकाशिनी
योगेश्वरेश्वरी माता महाशक्तिर्मनोमयी १३४
विश्वावस्था वियन्मूर्त्तिर्विद्युन्माला विहायसी
किंनरी सुरभिर्विद्या नन्दिनी नन्दिवल्लभा १३५
भारती परमानन्दा परापरविभेदिका
सर्वप्रहरणोपेता काम्या कामेश्वरेश्वरी १३६
अचिन्त्यानन्तविभवा भूलेखा कनकप्रभा
कूष्माण्डी धनरत्नाढ्या सुगन्धा गन्धायिनी १३७
त्रिविक्रमपदोद्भूता धनुष्पाणिः शिवोदया
सुदुर्लभा धनाध्यक्षा धन्या पिङ्गललोचना १३८
शान्तिः प्रभावती दीप्तिः पङ्कजायतलोचना
आद्या हृत्कमलोद्भूता गवां माता रणप्रिया १३९
सत्क्रिया गिरिशा शुद्धिर्नित्यपुष्टा निरन्तरा
दुर्गा कात्यायनी चण्डी चर्चिताङ्गा सुविग्रहा १४०
हिरण्यवर्णा जगती जगद्यन्त्रप्रवर्त्तिका
मन्दराद्रिनिवासा च शारदा स्वर्णमालिनी १४१
रत्नमाला रत्नगर्भा पुष्टिर्विश्वप्रमाथिनी
पद्मानना पद्मनिभा नित्यतुष्टामृतोद्भवा १४२
धुन्वती दुष्प्रकम्पा च सूर्यमाता दृषद्वती
महेन्द्रभगिनी सौम्या वरेण्या वरदायिका १४३
कल्याणी कमलावासा पञ्चचूडा वरप्रदा
वाच्याऽमरेश्वरी वन्द्या दुर्जया दुरतिक्रमा १४४
कालरात्रिर्महावेगा वीरभद्रप्रिया हिता
भद्रकाली जगन्माता भक्तानां भद्रदायिनी १४५
कराला पिङ्गलाकारा कामभेदा महास्वना

यशस्विनी यशोदा च षडध्वपरिवर्त्तिका १४६
शङ्खिनी पद्मिनी सांख्या सांख्ययोगप्रवर्त्तिका
चैत्रा संवत्सरारूढा जगत्संपूरणीन्द्रजा १४७
शुम्भारिः खेचरी स्वस्था कम्बुग्रीवा कलिप्रिया
खगध्वजा खगारूढा वाराही पूगमालिनी १४८
ऐश्वर्यपद्मनिलया विरक्ता गरुडासना
जयन्ती हृद्गुहागम्या शंकरेष्टगणाग्रणीः १४९
संकल्पसिद्धा साम्यस्था सर्वविज्ञानदायिनी
कलिः कल्कविहन्त्री च गुह्योपनिषदुत्तमा १५०
निष्ठा दृष्टिः स्मृतिर्व्याप्तिः पुष्टिस्तुष्टिः क्रियावती
विश्वामरेश्वरेशाना भुक्तिर्मुक्तिः शिवामृता १५१
लोहिता सर्पमाला च भीषणी नरमालिनी
अनन्तशयनानन्ता नरनारायणोद्भवा १५२
नृसिंही दैत्यमथनी शङ्खचक्रगदाधरा
संकर्षणसमुत्पत्तिरम्बिका पादसंश्रया १५३
महाज्वाला महामूर्तिः सुमूर्त्तिः सर्वकामधुक्
सुप्रभा सुस्तना गौरी धर्मकामार्थमोक्षदा १५४
भ्रूमध्यनिलया पूर्वा पुराणपुरुषारणिः
महाविभूतिदा मध्या सरोजनयना समा १५५
अष्टादशभुजानाद्या नीलोत्पलदलप्रभा
सर्वशक्त्यासनारूढा धर्माधर्मविवर्जिता १५६
वैराग्यज्ञाननिरता निरालोका निरिन्द्रिया
विचित्रगहनाधारा शाश्वतस्थानवासिनी १५७
स्थानेश्वरी निरानन्दा त्रिशूलवरधारिणी
अशेषदेवतामूर्त्तिर्देवता वरदेवता

गणाम्बिका गिरेः पुत्री निशुम्भविनिपातिनी १५८
अवर्णा वर्णरहिता त्रिवर्णा बीजसंभवा
अनन्तवर्णानन्यस्था शङ्करी शान्तमानसा १५९
अगोत्रा गोमती गोप्त्री गुह्यरूपा गुणोत्तरा
गौर्गीर्गव्यप्रिया गौणी गणेश्वरनमस्कृता १६०
सत्यभामा सत्यसंधा त्रिसंध्या संधिवर्जिता
सर्ववादाश्रया संख्या सांख्ययोगसमुद्भवा १६१
असंख्येयाप्रमेयाख्या शून्या शुद्धकुलोद्भवा
बिन्दुनादसमुत्पत्तिः शंभुवामा शशिप्रभा १६२
पिशङ्गा भेदरहिता मनोज्ञा मधुसूदनी
महाश्रीः श्रीसमुत्पत्तिस्तमः पारे प्रतिष्ठिता १६३
त्रितत्त्वमाता त्रिविधा सुसूक्ष्मपदसंश्रया
शान्त्यतीता मलातीता निर्विकारा निराश्रया १६४
शिवाख्या चित्तनिलया शिवज्ञानस्वरूपिणी
दैत्यदानवनिर्मथ्नी काश्यपी कालकर्णिका १६५
शास्त्रयोनिः क्रियामूर्त्तिश्चतुर्वर्गप्रदर्शिका
नारायणी नरोद्भूतिः कौमुदी लिङ्गधारिणी १६६
कामुकी ललिता भावा परावरविभूतिदा
परार्द्धजातमहिमा वडवा वामलोचना १६७
सुभद्रा देवकी सीता वेदवेदाङ्गपारगा
मनस्विनी मन्युमाता महामन्युसमुद्भवा १६८
अमन्युरमृतास्वादा पुरुहूता पुरुष्टुता
अशोच्या भिन्नविषया हिरण्यरजतप्रिया १६९
हिरण्यरजनी हैमी हेमाभरणभूषिता
विभ्राजमाना दुर्ज्ञेया ज्योतिष्टोमफलप्रदा १७०

महानिद्रासमुद्भूतिरनिद्रा सत्यदेवता
दीर्घा ककुद्मिनी हृद्या शान्तिदा शान्तिवर्द्धिनी १७१
लक्ष्म्यादिशक्तिजननी शक्तिचक्रप्रवर्त्तिका
त्रिशक्तिजननी जन्या षडूर्मिपरिवर्जिता १७२
सुधामा कर्मकरणी युगान्तदहनात्मिका
संकर्षणी जगद्धात्री कामयोनिः किरीटिनी १७३
ऐन्द्री त्रैलोक्यनमिता वैष्णवी परमेश्वरी
प्रद्युम्नदयिता दान्ता युग्मदृष्टिस्त्रिलोचना १७४
मदोत्कटा हंसगतिः प्रचण्डा चण्डविक्रमा
वृषावेशा वियन्मात्रा विन्ध्यपर्वतवासिनी १७५
हिमवन्मेरुनिलया कैलासगिरिवासिनी
चाणूरहन्तृतनया नीतिज्ञा कामरूपिणी १७६
वेदवेद्या व्रतस्नाता ब्रह्मशैलनिवासिनी
वीरभद्रप्रजा वीरा महाकामसमुद्भवा १७७
विद्याधरप्रिया सिद्धा विद्याधरनिराकृतिः
आप्यायनी हरन्ती च पावनी पोषणी कला १७८
मातृका मन्मथोद्भूता वारिजा वाहनप्रिया
करीषिणी सुधावाणी वीणावादनतत्परा १७९
सेविता सेविका सेव्या सिनीवाली गरुत्मती
अरुन्धती हिरण्याक्षी मृगाक्षी मानदायिनी १८०
वसुप्रदा वसुमती वसोर्द्धारा वसुंधरा
धाराधरा वरारोहा चराचरसहस्रदा १८१
श्रीफला श्रीमती श्रीशा श्रीनिवासा शिवप्रिया
श्रीधरा श्रीकरी कल्या श्रीधरार्द्धशरीरिणी १८२
अनन्तदृष्टिरक्षुद्रा धात्रीशा धनदप्रिया

निहन्त्री दैत्यसङ्घानां सिंहिका सिंहवाहना १८३
सुवर्चला च सुश्रोणी सुकीर्त्तिश्छिन्नसंशया
रसज्ञा रसदा रामा लेलिहानामृतस्रवा १८४
नित्योदिता स्वयञ्ज्योतिरुत्सुका मृतजीवनी
वज्रतुण्डा वज्रजिह्वा वैदेवी वज्रविग्रहा १८५
मङ्गल्या मङ्गला माला निर्मला मलहारिणी
गान्धर्वो गारुडी चान्द्री कम्बलाश्वतरप्रिया १८६
सौदामिनी जनानन्दा भ्रुकुटीकुटिलानना
कर्णिकारकरा कद्त्या कंसप्राणापहारिणी १८७
युगन्धरा युगावर्त्ता त्रिसंध्या हर्षवर्द्धनी
प्रत्यक्षदेवता दिव्या दिव्यगन्धाधिवासना १८८
शक्रासनगता शाक्री साध्या चारुशरासना
इष्टा विशिष्टा शिष्टेष्टा शिष्टाशिष्टप्रपूजिता १८९
शतरूपा शतावर्त्ता विनता सुरभिः सुरा
सुरेन्द्रमाता सुद्युम्ना सुषुम्णा सूर्यसंस्थिता १९०
समीक्षा सत्प्रतिष्ठा च निवृत्तिर्ज्ञानपारगा
धर्मशास्त्रार्थकुशला धर्मज्ञा धर्मवाहना १९१
धर्माधर्मविनिर्मात्री धार्मिकाणां शिवप्रदा
धर्मशक्तिर्धर्ममयी विधर्मा विश्वधर्मिणी १९२
धर्मान्तरा धर्ममयी धर्मपूर्वा धनावहा
धर्मोपदेष्ट्री धर्मात्मा धर्मगम्या धराधरा १९३
कपालीशा कलामूर्त्तिः कालाकलितविग्रहा
सर्वशक्तिविनिर्मुक्ता सर्वशक्त्याश्रयाश्रया १९४
सर्वा सर्वेश्वरी सूक्ष्मा सूक्ष्मज्ञानस्वरूपिणी
प्रधानपुरुषेशेशा महादेवैकसाक्षिणी

ततः स भैरवो देवो नृसिंहवपुषं हरिम्
दध्यौ नारायणं देवं प्रणम्य च कृताञ्जलिः २२५
उमेशचिन्तितं ज्ञात्वा क्षणात्प्रादुरभूद्धरिः
विज्ञापयामास च तं भक्षयन्तीह मातरः
निवारयाशु त्रैलोक्यं त्वदीया भगवन्निति २२६
संस्मृता विष्णुना देव्यो नृसिंहवपुषा पुनः
उपतस्थुर्महादेवं नरसिंहाकृतिं ततः २२७
संप्राप्य सन्निधिं विष्णोः सर्वाः संहारकारिकाः
प्रददुः शंभवे शक्तिं भैरवायातितेजसे २२८
अपश्यंस्ता जगत्सूतिं नृसिंहमतिभैरवम्
क्षणादेकत्वमापन्नं शेषाहिं चापि मातरः २२९
व्याजहार हृषीकेशो ये भक्ताः शूलपाणये
ये च मां संस्मरन्तीह पालनीयाः प्रयत्नतः २३०
ममैव मूर्त्तिरतुला सर्वसंहारकारिका
महेश्वराङ्गसंभूता भुक्तिमुक्तिप्रदायिनी २३१
अनन्तो भगवान्कालो द्विधावस्था ममैव तु
तामसी राजसी मूर्त्तिर्देवदेवश्चतुर्मुखः २३२
सोऽहं देवो दुराधर्षः कालो लोकप्रकालनः
भक्षयिष्यामि कल्पान्ते रौद्रेण निखिलं जगत् २३३
या सा विमोहिनी मूर्त्तिर्मम नारायणाह्वया
सत्त्वोद्रिक्ता जगत्सर्वं संस्थापयति नित्यदा २३४
स विष्णुः परमं ब्रह्म परमात्मा परा गतिः
मूलप्रकृतिरव्यक्ता सदानन्देति कथ्यते २३५
इत्येवं बोधिता देव्यो विष्णुना विष्णुमातरः
प्रपेदिरे महादेवं तमेव शरणं परम् २३६

चातुर्वर्ण्यसमायुक्तमशेषं क्षितिमण्डलम्  ४६
एवमुक्त्वा स तद्राज्यं निधायात्मभवे नृपः
जगामारण्यमनघस्तपस्तप्तुमनुत्तमम्  ४७
हिमवच्छिखरे रम्ये देवदारुवनाश्रये
कन्दमूलफलाहारैरुत्पन्नैरयजत्सुरान्  ४८
संवत्सरशतं साग्रं तपोनिर्धूतकिल्विषः
जजाप मनसा देवीं सावित्रीं वेदमातरम्  ४९
तस्यैवं जपतो देवः स्वयंभूः परमेश्वरः
हिरण्यगर्भो विश्वात्मा तं देशमगमत्स्वयम्  ५०
दृष्ट्वा देवं समायान्तं ब्रह्माणं विश्वतोमुखम्
ननाम शिरसा तस्य पादयोर्नाम कीर्तयन्  ५१
नमो देवाधिदेवाय ब्रह्मणे परमात्मने
हिरण्यमूर्तये तुभ्यं सहस्राक्षाय वेधसे  ५२
नमो धात्रे विधात्रे च नमो देवात्ममूर्तये
सांख्ययोगाधिगम्याय नमस्ते ज्ञानमूर्तये  ५३
नमस्त्रिमूर्तये तुभ्यं स्रष्ट्रे सर्वार्थवेदिने
पुरुषाय पुराणाय योगिनां गुरवे नमः  ५४
ततः प्रसन्नो भगवान्विरिञ्चो विश्वभावनः
वरं वरय भद्रं ते वरदोऽस्मीत्यभाषत  ५५
राजोवाच
जपेयं देवदेवेश गायत्रीं वेदमातरम्
भूयो वर्षशतं साग्रं तावदायुर्भवेन्मम  ५६
वाढमित्याह विश्वात्मा समालोक्य नराधिपम्
स्पृष्ट्वा कराभ्यां सुप्रीतस्तत्रैवान्तरधीयत  ५७
सोऽपि लब्धवरः श्रीमान् जजापातिप्रसन्नधीः

योऽधीत्य विधिवद्वेदं वेदार्थं न विचारयेत्
स सान्वयः शूद्रकल्पः पात्रतां न प्रपद्यते  ८७
यदि चात्यन्तिकं वासं कर्तुमिच्छति वै गुरौ
युक्तः परिचरेदेनमा शरीराभिघातनात्  ८८
गत्वा वनं वा विधिवज्जुहुयाज्ञातवेदसम्
अभ्यसेत्स तदा नित्यं ब्रह्मनिष्ठः समाहितः  ८९
सावित्रीं शतरुद्रीयं वेदाङ्गानि विशेषतः
अभ्यसेत्सततं युक्तो भस्मस्नानपरायणः  ९०
एतद्विधानं परमं पुराणं वेदाङ्गतः सम्यगिहेरितं वः
पुरा महर्षिप्रवरानुपृष्टः स्वायंभुवो यन्मनुराह देवः  ९१
एवमीश्वरसमर्पितान्तरो योऽनुतिष्ठति विधिं विधानवित्
मोहजालमपहाय सोऽमृतं याति तत्पदमनामयं शिवम्  ९२

इति श्रीकौर्मे महापुराणे उत्तरभागे व्यासगीतायां
वेदाध्ययनादिक्रमनियमो नाम चतुर्दशोऽध्यायः

## पञ्चदशोऽध्यायः

व्यास उवाच
वेदं वेदौ तथा वेदान्विद्याद्वा चतुरो द्विजाः
अधीत्य चाभिगम्यार्थं ततः स्नायाद्द्विजोत्तमाः  १
गुरवे तु घनं दत्त्वा स्नायीत तदनुज्ञया
चीर्णव्रतोऽथ युक्तात्मा स शक्तः स्नातुमर्हति  २
वैणवीं धारयेद्यष्टिमन्तर्वासस्तथोत्तरम्
यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्  ३
छत्रं चोष्णीषममलं पादुके चाप्युपानहौ
रौक्मे च कुण्डले धार्ये व्युप्तकेशनखः शुचिः  ४

पिराडं प्रतिदिनं दद्युः सायं प्रातर्यथाविधि
प्रेताय च गृहद्वारि चतुर्थे भोजयेद्द्विजान् ८०
द्वितीयेऽहनि कर्तव्य त्तुरकर्म सबान्धवैः
चतुर्थे बान्धवैः सर्वैरस्थां संचयनं भवेत्
पूर्वान् प्रयुञ्जयेद्विप्रान् युग्मान् सुश्रद्धया शुचीन् ८१
पञ्चमे नवमे चैव तथैवैकादशेऽहनि
श्रयुग्मान्भोजयेद्विप्रान्नवश्राद्धं तु तद्द्विजाः ८२
एकादशेऽह्नि कुर्वीत प्रेतमुद्दिश्य भावतः
द्वादशे वाह्नि कर्तव्यं नवमेऽप्यथ वाहनि
एकं पवित्रमेकोऽर्धः पिराडपात्रं तथैव च ८३
एवं मृताह्नि कर्तव्यं प्रतिमासं तु वत्सरम्
सपिराडीकरणं प्रोक्तं पूर्णे संवत्सरे पुनः ८४
कुर्याच्चत्वारि पात्राणि प्रेतादीनां द्विजोत्तमाः
प्रेतान्नं पितृपात्रेषु पात्रमासेचयेत्ततः ८५
ये समाना इति द्वाभ्यां पिराडानप्येवमेव हि
सपिराडीकरणश्राद्धं देवपूर्वं विधीयते ८६
पितृनावाहयेत्तत्र पुनः प्रेतं विनिर्दिशेत्
ये सपिराडीकृताः प्रेता न तेषां स्युः पृथक्क्रियाः
यस्तु कुर्यात्पृथक् पिराडं पितृहा सोऽभिजायते ८७
मृते पितरि वै पुत्रः पिराडमब्दं समाचरेत्
दद्याच्चान्नं सोदकुम्भं प्रत्यहं प्रेतधर्मतः ८८
पार्वरोन विधानेन सांवत्सरिकमिष्यते
प्रतिसंवत्सरं कुर्याद्विधिरेष सनातनः ८९
मातापित्रोः सुतैः कार्यं पिराडदानादिकं च यत्
पत्नी कुर्यात्सुताभावे पत्न्यभावे तु सोदरः ९०

दम्भाहङ्कारनिर्मुक्तो निन्दापैशुन्यवर्जितः
आत्मज्ञानगुणोपेतो यतिर्मोक्षमवाप्नुयात् २१
अभ्यसेत्सततं देवं प्रणवाख्यं सनातनम्
स्नात्वाचम्य विधानेन शुचिर्देवालयादिषु २२
यज्ञोपवीती शान्तात्मा कुशपाणिः समाहितः
धौतकाषायवसनो भस्मच्छन्नतनूरुहः २३
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव वा
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् २४
पुत्रेषु चाथ निवसन्ब्रह्मचारी यतिर्मुनिः
वेदमेवाभ्यसेन्नित्यं स याति परमां गतिम् २५
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं ततः परम्
क्षमा दया च सन्तोषो व्रतान्यस्य विशेषतः २६
वेदान्तज्ञाननिष्ठो वा पञ्च यज्ञान्समाहितः
कुर्यादहरहः स्नात्वा भिक्षान्नेनैव तेन हि २७
होममन्त्रान् जपेन्नित्यं होमकाले समाहितः
स्वाध्यायं चान्वहं कुर्यात्सावित्रीं संध्ययोर्जपेत् २८
ध्यायीत सततं देवमेकान्ते परमेश्वरम्
एकान्तं वर्जयेन्नित्यं कामं क्रोधं परिग्रहम् २९
एकवासा द्विवासा वा शिखी यज्ञोपवीतवान्
कमण्डलुधरो विद्वांस्त्रिदण्डी याति तत्परम् ३०

इति श्रीकौर्मे महापुराणे उत्तरभागे व्यासगीतायां यतिधर्मो नामाष्टाविंशोऽध्यायः

## एकोनत्रिंशोऽध्यायः

व्यास उवाच

